**Hall Ticket Number**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | | | | | | | | |

**Q.B.No. 5 4 2 1 4 3**

**Booklet Code : C**

**Marks : 100**

**Time : 120 minutes**

**3TS2**

**Signature of the Candidate**

**Signature of the Invigilator**

## परीक्षार्थिभ्यः सूचनाः

**(उत्तरदानात् प्राक् सूचनाः सावधानं पठनीयाः)**

1. भवद्भ्यः पृथक् OMR उत्तरपत्रं प्रश्नपत्रपुस्तिकया सह दीयते । OMR पत्रे उत्तराणाम् अङ्कनार्थमपेक्षितविषयाणां लेखनार्थञ्च तत्र दत्ताः सूचनाः पठनीयाः अनुसरणीयाश्च ।
2. प्रश्नपत्रपुस्तिकायाः OMR उत्तरपत्रस्य च कूटसंख्या समाना अस्तीति अभ्यर्थिभिः द्रष्टव्यम् ।
3. **प्रश्नपत्रपुस्तिकायाः उन्मोचनसमनन्तरमेव एते अंशाः अवधेयाः, यथा - (i) प्रश्नपत्रपुस्तिकायाः प्रत्येकस्मिन्नपि पुटे कूटसंख्या (A/B/C/D) समाना स्यात्, (ii) प्रश्नानां क्रमसंख्या (1-100), (iii) पुटानां संख्या, (iv) शुद्धं मुद्रणञ्च ।** यदि प्रश्नपत्रपुस्तिकायाम् उपर्युक्तांशेषु त्रुटिः भवति, तर्हि परीक्षाप्रारम्भात् पञ्चनिमेषेषु निरीक्षकं संसूच्य, प्राक्तनकूटसंख्यायुक्ता नूतनप्रश्नपत्रपुस्तिका स्वीकरणीया ।
4. परीक्षाप्रकोष्ठे चरवाणी, पेजर, गणकयन्त्रम्, घटी, गणितीयपट्टिकाः इत्यादीनि वैद्युतीयोपकरणानि नानुमन्यन्ते ।
5. **प्रत्येकम् अशुद्धम् उत्तरम् अङ्कस्यैकस्य चतुर्थांशम् (¼) अल्पं करिष्यति** । यदि प्रश्नः उत्तररहितः त्यज्यते चेत् सः प्रश्नः अङ्कस्यैकस्य चतुर्थांशं (¼) नाल्पं करिष्यति ।
6. OMR उत्तरपत्रे प्रश्नसंख्यामनुसृत्य निर्दिष्टप्रश्नस्य शुद्धं समुचितं वा उत्तरं (1), (2), (3) अथवा (4) इति निर्दिष्टे गोलके कृष्णीकरणीयम् । कस्यापि प्रश्नस्य एकाधिकगोलकेषु कृष्णीकरणेन उत्तरमवैधं भवति ।
7. उत्तरस्य परिवर्त्तनं नानुमतम् ।
8. प्रश्नपत्रपुस्तिकायां प्रदत्ते निर्दिष्टस्थले एव अतिरिक्तकार्यम् (Rough Work) करणीयम् ।
9. OMR उत्तरपत्रं प्रश्नपत्रपुस्तिकाञ्च निरीक्षकाय दत्वा परीक्षाप्रकोष्ठात् बहिः गन्तव्यम् । यदि OMR उत्तरपत्रं न प्रत्यर्प्यते, तर्हि आपराधिक-अभियोगः भवति ।

**अस्यां प्रश्नपत्रपुस्तिकायां शतस्य प्रश्नानां कृते 13 पुटानि, अतिरिक्तकार्याय (Rough Work) पुटद्वयम्, एकं शीर्षकपुटं चाहत्य 16 पुटानि सन्ति ।**

## SPACE FOR ROUGH WORK

**3TS2** **Booklet Code C**

**समयः - होराद्वयम्** **अङ्काः - 100**

**सूचनाः -**

i) प्रत्येकं प्रश्नस्य कृते एकः अङ्कः । **प्रत्येकम् अशुद्धम् उत्तरम् अङ्कस्यैकस्य चतुर्थांशम्** (¼) **अल्पं करिष्यति** ।

ii) अधोनिर्दिष्टानां प्रश्नानां कृते प्रदत्तेषु विकल्पेषु शुद्धं समुचितं वा विकल्पं चित्वा नील / कृष्णवर्णलेखन्या (Blue/ Black Ball Point Pen) पृथक्तया प्रदत्ते OMR उत्तरपत्रे निर्दिष्टप्रश्नसंख्यायाः पुरतः विद्यमानेषु गोलकेषु **1, 2, 3** अथवा **4** गोलकं कृष्णीकरणीयम् ।

---

1. ''अयमैन्द्रीमुखं पश्य ! रक्तश्चुम्बति चन्द्रमाः ।'' अत्र कः अलङ्कारः ?
   (1) सन्देहः (2) समासोक्तिः (3) सहोक्तिः (4) परिकरालङ्कारः

2. 'उपमानोपमेयत्वं यदेकस्यैव वस्तुनः' कः अलङ्कारः ?
   (1) उत्प्रेक्षा (2) रूपकम् (3) अनन्वयः (4) समासोक्तिः

3. ''विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यद्'' - कस्य अलङ्कारस्य लक्षणमिदम् ?
   (1) दीपकस्य (2) अनन्वयस्य (3) सन्देहस्य (4) रूपकस्य

4. ''लिम्पतीव तमोऽङ्गानि'' इत्यत्र कः अलङ्कारः ?
   (1) उत्प्रेक्षा (2) अतिशयोक्तिः (3) दृष्टान्तः (4) भ्रान्तिमत्

5. ''एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते'' अत्र कः अलङ्कारः ?
   (1) विनोक्तिः (2) समासोक्तिः (3) विशेषोक्तिः (4) अप्रस्तुतप्रशंसा

6. ''अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम्'' अत्र कः अलङ्कारः ?
   (1) भ्रान्तिमदलङ्कारः (2) स्मृत्यलङ्कारः (3) उत्प्रेक्षा (4) दृष्टान्तः

7. ''पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः'' अत्र कः अलङ्कारः ?
   (1) रूपकम् (2) सन्देहः (3) अनन्वयः (4) भ्रान्तिमद्

8. निगीर्याध्यवसानतः कः अलङ्कारः स्यात् ?
   (1) रूपकम् (2) उत्प्रेक्षा (3) अतिशयोक्तिः (4) सन्देहः

9. वर्ण्यावर्ण्यानां धर्मैक्यं किम् भवति ?
   (1) स्वभावोक्तिः (2) काव्यलिङ्गम् (3) रूपकम् (4) दीपकम्

10. ''हनूमानब्धिमतरद्दुष्करं किं महात्मनाम्'' अत्र कः अलङ्कारः ?
    (1) अतिशयोक्तिः (2) अर्थान्तरन्यासः (3) अप्रस्तुतप्रशंसा (4) अनन्वयः

11. नासदीयसूक्तस्य द्रष्टा कः ?
(1) विश्वामित्रः । (2) कश्यपः ।
(3) प्रजापतिः परमेष्ठी । (4) सुकीर्तिः ।

12. ''नाहं विन्दामि कितवस्य भोगम्'' - इति मन्त्रपादे ''कितव''शब्दस्य कोऽर्थः ?
(1) द्यूतव्यसनी (2) मन्त्रद्रष्टा (3) देवता (4) पालकः

13. ऐतरेयब्राह्मणं कस्य वेदस्य ब्राह्मणम् ?
(1) अथर्ववेदस्य (2) सामवेदस्य (3) यजुर्वेदस्य (4) ऋग्वेदस्य

14. अधोनिर्दिष्टोपनिषत्सु का कस्य वेदस्य उपनिषदिति दत्तेषु उत्तरक्रमेषु समीचीनमुत्तरक्रमं चिनुत ?
i) केनोपनिषत् क) कृष्णयजुर्वेदस्य
ii) कठोपनिषत् ख) सामवेदस्य तलवकारशाखायाः
iii) प्रश्नोपनिषत् ग) ऋग्वेदस्य
iv) ऐतरेयोपनिषत् घ) अथर्ववेदस्य
उत्तरक्रमाः
(1) i-क ii-ख iii-ग iv-घ
(2) i-ख ii-क iii-घ iv-ग
(3) i-घ ii-ग iii-ख iv-क
(4) i-ग ii-ख iii-क iv-घ

15. आर्षी छन्दोवर्गे गायत्रीछन्दसि चतुर्षु पादेषु प्रतिपादं कति अक्षराणि भवन्ति ?
(1) 5 (2) 7 (3) 6 (4) 9

16. निरुक्तग्रन्थस्य कर्ता कः ?
(1) दुर्गाचार्यः (2) वल्लभाचार्यः (3) यास्काचार्यः (4) कात्यायनः

17. वाजसनेयिशुक्लयजुःप्रातिशाख्यस्य कर्ता कः ?
(1) शौनकः (2) कात्यायनः (3) ताण्ड्यः (4) कश्यपः

18. नारदीयशिक्षा कस्य वेदस्य शिक्षा ?
(1) यजुर्वेदस्य (2) अथर्ववेदस्य (3) ऋग्वेदस्य (4) सामवेदस्य

19. ''शाङ्खायनारण्यकम्'' केन वेदेन सम्बद्धः ?
(1) ऋग्वेदेन (2) सामवेदेन (3) यजुर्वेदेन (4) अथर्ववेदेन

20. उपवेदेषु अयं नास्ति ?
(1) आयुर्वेदः (2) धनुर्वेदः (3) पञ्चमवेदः (4) गान्धर्ववेदः

21. वाल्मीकिरामायणस्य पंचमकाण्डस्य नामास्ति -
(1) अरण्यकाण्डः (2) किष्किन्धाकाण्डः (3) सुन्दरकाण्डः (4) उत्तरकाण्डः

22. महाभारतस्य प्रभावः कस्योपरि नास्ति ?
(1) कालिदासस्य (2) भारवेः (3) माघस्य (4) वाल्मीकेः

23. ''यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्'' पद्यखण्डः कुत्रत्यः ?
(1) रामायणस्थः (2) महाभारतस्थः
(3) कालिदासकाव्यस्थः (4) माघकाव्यस्थः

24. रामायणस्य बीजभूतः श्लोकः अस्ति ।
(1) वज्रादपि कठोराणि मृदूनि कुसुमादपि । (2) मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः ।
(3) स्नेहं दयां च सौख्यं च यदि वा जानकीमपि । (4) उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।

25. वाल्मीकिरामायणाधारित-उपजीव्यकाव्यं नास्ति -
(1) प्रतिमानाटकम् (2) कुन्दमाला (3) उत्तररामचरितम् (4) मुद्राराक्षसम्

26. नैषधीयचरितस्य उपजीव्यकाव्यमस्ति -
(1) रामायणम् (2) महाभारतम्
(3) भागवतपुराणम् (4) श्रीमद्भागवतपुराणम्

27. अहल्योद्धारः कस्मिन् काण्डे वर्तते -
(1) बालकाण्डे (2) अयोध्याकाण्डे (3) अरण्यकाण्डे (4) सुन्दरकाण्डे

28. महाभारतस्य अङ्गिरसः -
(1) वीररसः (2) बीभत्सरसः (3) करुणरसः (4) शान्तरसः

29. महाभारतस्य कस्मिन् पर्वणि सावित्री-सत्यवतोः कथा अस्ति -
(1) आदिपर्वणि (2) सभापर्वणि (3) वनपर्वणि (4) विराटपर्वणि

30. महाभारते श्रीमद्भगवद्गीता वर्तते -
(1) भीष्मपर्वणि (2) शान्तिपर्वणि (3) उद्योगपर्वणि (4) द्रोणपर्वणि

31. अधोनिर्दिष्टरूपक-रूपककर्तॄणां समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | दूतवाक्यम् | क) | शूद्रकः |
| ii) | मृच्छकटिकम् | ख) | कालिदासः |
| iii) | मालतीमाधवम् | ग) | भासः |
| iv) | मालविकाग्निमित्रम् | घ) | भवभूतिः |

उत्तरक्रमः

| | | | | |
|---|---|---|---|---|
| (1) | i-घ | ii-ग | iii-ख | iv-क |
| (2) | i-ग | ii-क | iii-घ | iv-ख |
| (3) | i-क | ii-ख | iii-ग | iv-घ |
| (4) | i-ग | ii-क | iii-ख | iv-घ |

32. अधोनिर्दिष्टभासरूपकाणां यथाक्रमं कथावस्तुमूलनिरूपणं कुरुत ।

| | | | |
|---|---|---|---|
| i) | पञ्चरात्रम् | क) | उत्पाद्यम् |
| ii) | प्रतिमानाटकम् | ख) | महाभारतम् |
| iii) | प्रतिज्ञायौगन्धरायणम् | ग) | रामायणम् |
| iv) | अविमारकम् | घ) | बृहत्कथा |

उत्तरक्रमः

| | | | | |
|---|---|---|---|---|
| (1) | i-ख | ii-ग | iii-घ | iv-क |
| (2) | i-क | ii-ख | iii-ग | iv-घ |
| (3) | i-घ | ii-ग | iii-ख | iv-क |
| (4) | i-क | ii-ग | iii-ख | iv-घ |

33. अभिज्ञानशाकुन्तले कण्वमहर्षेः द्वयोः शिष्ययोः नामनी के ?

(1) कुशः लवश्च
(2) गोतममतङ्गौ
(3) चारुशीलः चारुकेशश्च
(4) शार्ङ्गरवः शारद्वतश्च

34. ''पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।''

कस्माद्रूपकात् उद्धृतमिदम् वाक्यम् ?

(1) मालविकाग्निमित्रात्
(2) मृच्छकटिकात्
(3) मुद्राराक्षसात्
(4) मालतीमाधवात्

35. ''हितं मनोहारि च दुर्लभं वचः'' - कस्य वचनमिदम् ?
(1) युधिष्ठिरस्य (2) वनेचरस्य (3) भीमस्य (4) द्रौपद्याः

36. ''स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः'' इति भीमसेनवचनेषु ''धार्तराष्ट्राः'' इति शब्दस्य कः अर्थः ?
(1) धृतराष्ट्रस्य पूर्वजाः (2) धृतराष्ट्रः एव
(3) धृतराष्ट्रस्य मन्त्रिणः (4) धृतराष्ट्रस्य पुत्राः

37. अधोनिर्दिष्टानां पात्राणां रूपकाणां च यथाक्रमं योजनं कुरुत ।

| | | | |
|---|---|---|---|
| i) | कण्वः | क) | वेणीसंहारम् |
| ii) | राक्षसः | ख) | मृच्छकटिकम् |
| iii) | शकारः | ग) | मुद्राराक्षसम् |
| iv) | चार्वाकः | घ) | अभिज्ञानशाकुन्तलम् |

उत्तरक्रमः

| | | | | |
|---|---|---|---|---|
| (1) | i-क | ii-ख | iii-ग | iv-घ |
| (2) | i-घ | ii-ग | iii-क | iv-ख |
| (3) | i-घ | ii-ग | iii-ख | iv-क |
| (4) | i-क | ii-ख | iii-घ | iv-ग |

38. अधोनिर्दिष्टानां राज्ञां रूपकाणां च समीचीनम् उत्तरक्रमं सूचयत ।

| | | | |
|---|---|---|---|
| i) | युधिष्ठिरः | क) | महावीरचरितम् |
| ii) | कर्णः | ख) | वेणीसंहारम् |
| iii) | जीमूतवाहनः | ग) | कर्णभारम् |
| iv) | श्रीरामः | घ) | नागानन्दम् |

उत्तरक्रमः

| | | | | |
|---|---|---|---|---|
| (1) | i-ग | ii-ख | iii-घ | iv-क |
| (2) | i-घ | ii-ग | iii-ख | iv-क |
| (3) | i-क | ii-ख | iii-ग | iv-घ |
| (4) | i-ख | ii-ग | iii-घ | iv-क |

39. वासवदत्ताहस्ते यौगन्धरायणेन ''सागरिका'' इति नाम्ना निक्षिप्ता कन्या का ?
(1) सिंहलराजपुत्री रत्नावली (2) मगधराजपुत्री पद्मावती
(3) मद्रराजसुता सुमतिः (4) कोसलेश्वरदुहिता कल्याणी

40. अधोनिर्दिष्टरूपकाणां तद्गतपात्राणां च योजनं कृत्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | पद्मावती | क) | नागानन्दम् |
| ii) | शर्विलकः | ख) | वेणीसंहारम् |
| iii) | शङ्खचूडः | ग) | स्वप्नवासवदत्तम् |
| iv) | रुधिरप्रियः | घ) | मृच्छकटिकम् |

उत्तरक्रमः

(1) i-घ ii-क iii-ग iv-ख

(2) i-क ii-ख iii-ग iv-घ

(3) i-घ ii-ग iii-ख iv-क

(4) i-ग ii-घ iii-क iv-ख

---

41. अधोनिर्दिष्टमहाकाव्यानि तत्तत्कर्तृभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | रावणवधम् | क) | पाणिनिः |
| ii) | बुद्धचरितम् | ख) | भट्टिः |
| iii) | पातालविजयम् | ग) | माघः |
| iv) | शिशुपालवधम् | घ) | अश्वघोषः |

उत्तरक्रमः

(1) i-ख ii-घ iii-क iv-ग

(2) i-ख ii-क iii-ग iv-घ

(3) i-क ii-ख iii-घ iv-ग

(4) i-घ ii-ग iii-क iv-ख

---

42. अधोनिर्दिष्टलघुकाव्यानि तत्तत्कर्तृभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | भामिनीविलासः | क) | शङ्कराचार्याः |
| ii) | पादुकासहस्रम् | ख) | मधुसूदनसरस्वती |
| iii) | आनन्दमन्दाकिनी | ग) | जगन्नाथपण्डितराजः |
| iv) | सौन्दर्यलहरी | घ) | वेदान्तदेशिकः |

उत्तरक्रमः

(1) i-क ii-ग iii-घ iv-ख

(2) i-ग ii-घ iii-ख iv-क

(3) i-ख ii-ग iii-घ iv-क

(4) i-घ ii-ग iii-ख iv-क

43. अधोनिर्दिष्टसन्देशकाव्यानि तत्तत्कर्तृभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | पवनदूतम् | क) | विक्रमकविः |
| ii) | हंससन्देशः | ख) | कालिदासः |
| iii) | मेघदूतम् | ग) | वेदान्तदेशिकः |
| iv) | नेमिदूतम् | घ) | वादिचन्द्रः |

उत्तरक्रमः

(1) i-घ ii-क iii-ग iv-ख

(2) i-घ ii-ग iii-ख iv-क

(3) i-ख ii-क iii-ग iv-घ

(4) i-घ ii-ग iii-क iv-ख

---

44. अधोनिर्दिष्टैतिहासिककाव्यानि तत्तत्कर्तृभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | नवसाहसाङ्कचरितम् | क) | नयचन्द्रसूरी |
| ii) | विक्रमाङ्कदेवचरितम् | ख) | जोनराजः |
| iii) | हम्मीरमहाकाव्यम् | ग) | पद्मगुप्तपरिमलः |
| iv) | पृथ्वीराजचरितम् | घ) | बिल्हणः |

उत्तरक्रमः

(1) i-क ii-ख iii-ग iv-घ

(2) i-ख ii-घ iii-ग iv-क

(3) i-ग ii-घ iii-ख iv-क

(4) i-ग ii-घ iii-क iv-ख

---

45. अधोनिर्दिष्टगद्यकाव्यानि तत्तत्कर्तृभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | तिलकमञ्जरी | क) | वामनभट्टबाणः |
| ii) | वासवदत्ता | ख) | दण्डी |
| iii) | दशकुमारचरितम् | ग) | धनपालः |
| iv) | वेमभूपालचरितम् | घ) | सुबन्धुः |

उत्तरक्रमः

(1) i-क ii-ग iii-घ iv-ख

(2) i-घ ii-क iii-ग iv-ख

(3) i-ग ii-घ iii-ख iv-क

(4) i-घ ii-ग iii-ख iv-क

---

46. अधोनिर्दिष्टचम्पूकाव्यानि तत्तत्कर्तृभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | दमयन्तीचम्पूः | क) | सोमदेवसूरिः |
| ii) | यशस्तिलकचम्पूः | ख) | सोड्ढलः |
| iii) | जीवन्धरचम्पूः | ग) | त्रिविक्रमभट्टः |
| iv) | उदयसुन्दरी कथा | घ) | हरिचन्द्रः |

उत्तरक्रमः

(1) i-ग ii-क iii-घ iv-ख

(2) i-क ii-ख iii-ग iv-घ

(3) i-घ ii-ख iii-ग iv-क

(4) i-घ ii-ग iii-ख iv-क

---

47. अधोनिर्दिष्टकथाकाव्यानि तत्तत्कर्तृभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | पञ्चतन्त्रम् | क) | चिन्तामणिभट्टः |
| ii) | शुकसप्ततिः | ख) | बल्लालदेवः |
| iii) | भोजप्रबन्धः | ग) | शिवदासः |
| iv) | वेतालपञ्चविशंतिः | घ) | विष्णुशर्मा |

उत्तरक्रमः

(1) i-ग ii-घ iii-क iv-ख

(2) i-घ ii-ग iii-क iv-ख

(3) i-क ii-ख iii-ग iv-घ

(4) i-घ ii-क iii-ख iv-ग

---

48. अभिज्ञानशाकुन्तल-नाटके नायकः वर्तते ?

(1) धीरप्रशान्तः (2) धीरललितः (3) धीरोद्धतः (4) धीरोदात्तः

---

49. ''सरसिजमनुविद्धं शैवलेनापि रम्यम्'' कस्य कथनमस्ति ?

(1) दुष्यन्तस्य (2) कण्वस्य (3) माढव्यस्य (4) मातलेः

---

50. 'एकमेव पात्रं सर्वं नाट्यवस्तु प्रस्तौति' कुत्र विद्यते ?

(1) डिमे (2) प्रकरणे (3) भाणे (4) व्यायोगे

---

51. 'निरीक्ष्य' - इत्यस्मिन् पदे को धातुः कश्च प्रत्ययः -

(1) ईक्ष् - धातुः ण्यत् प्रत्ययः (2) ईक्ष् - धातुः क्यप् प्रत्ययः

(3) ईक्ष् - धातुः यत् प्रत्ययः (4) ईक्ष् - धातुः ल्यप् प्रत्ययः

52. ''ध्रुवमपाये अपादानम्'' इति सूत्रे अपायः नाम किम् ?
(1) विश्लेषः (2) दुर्घटना (3) मोक्षः (4) बन्धनम्

53. साधकतमं ________ संज्ञं स्यात् ।
(1) कारकम् (2) करणम् (3) कर्ता (4) कर्म

54. ''भूभृते'' इत्यत्र कः प्रत्ययः ?
(1) धातु-प्रत्ययः (2) समासान्तप्रत्ययः (3) सुप्प्रत्ययः (4) स्त्रीप्रत्ययः

55. ''कारकः'' इत्यत्र ''ण्वुल्'' प्रत्ययः कस्मिन्नर्थे अस्ति ।
(1) कर्तरि (2) कर्मणि (3) भावे (4) करणे

56. ''देवदत्तः ओदनं पचति'' - कर्मणि प्रयोगे परिवर्तनं कुरुत ।
(1) देवदत्तः ओदनेन पच्यते । (2) देवदत्तः ओदनं पच्यते ।
(3) देवदत्तेन ओदनं पच्यते । (4) देवदत्तेन ओदनं पचति ।

57. ''कविना काव्यं क्रियते'' - कर्तरि प्रयोगे परिवर्तनं कुरुत ।
(1) कविः काव्यं करोति । (2) कविना काव्यं करोति ।
(3) कविना काव्येन क्रियते । (4) कविः काव्येन क्रियताम् ।

58. अपठितपूर्वस्य गद्यस्य बोधः केन प्रकारेण भवति ?
(1) पदानां विभक्तिज्ञानेन (2) प्रातिपदिकार्थज्ञानेन
(3) पदपदार्थोभयज्ञानेन (4) पदपदार्थोभयज्ञानपूर्वकान्वितवाक्यार्थज्ञानेन

59. अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्यायशोबलम् ।।
अस्य श्लोकस्य अयं भावः भवति -
(1) वृद्धानां सेवया किमपि न प्राप्यते ।
(2) वृद्धानां सेवया आयुर्विद्यायशोबलानां क्षयः जायते ।
(3) वृद्धानां सेवया तेषाम् अभिवादनेन च आयुर्विद्यायशोबलानि वृद्धिं गच्छन्ति ।
(4) वृद्धानां सेवया समयः वृथा जायते ।

60. ''महर्षिः'' - सन्धिं विघटयत ।
(1) मह + ऋषिः (2) महा + ऋषिः (3) महः + ऋषिः (4) महत् + ऋषिः

61. ''भानूदयः'' - सन्धिं विघटयत ।
(1) भानून् + उदयः (2) भानू + दयः (3) भानु + उदयः (4) भानो + दयः

62. ''प्रष्ठ + ऊहः'' - सन्धत्त ।
(1) प्रष्ठौहः (2) प्रष्ठोहः (3) प्रष्ठ ऊहः (4) प्रष्ठाहः

63. ''उप + ओषति'' - सन्धत्त ।
(1) उपौषति (2) उपैति (3) औपौषति (4) उपोषति

64. ''शिवेहि'' - सन्धिं विघटयत ।
(1) शिव + एहि (2) विश + इहि (3) शिव + इहि (4) शिव + ऐहि

65. ''रामस् + टीकते'' - सन्धत्त ।
(1) रामस्टीकते (2) रामष्टीकते (3) रामश्टीकते (4) रामःटी + कते

66. ''अजन्तः'' - विघटयत ।
(1) अच् + न्तः (2) अज + न्तः (3) अच् + अन्तः (4) अच् + जन्तः

67. ''षट् + मासाः'' - सन्धत्त ।
(1) सण्मासाः (2) संमासाः (3) षंमासाः (4) षण्मासाः

68. ''कालः + गच्छति'' - सन्धत्त ।
(1) कालो गच्छति (2) कालगच्छति (3) काले गच्छति (4) कालौ गच्छति

69. ''हरिः + जयति'' - सन्धत्त ।
(1) हरिं जयति (2) हरिजयति (3) हरिर्जयति (4) हरिः चयति

70. उत्तरपदार्थप्रधानः समासः -
(1) बहुव्रीहिः (2) द्वन्द्वः (3) तत्पुरुषः (4) अव्ययीभावः

71. 'चार्थे द्वन्द्वः' अत्र चकारस्य कति अर्थाः ?
(1) चत्वारः (2) पञ्च (3) षड् (4) सप्त

72. 'इतिहरि' कस्य उदाहरणम् ?
(1) विभक्तिः (2) समृद्धिः (3) शब्दप्रादुर्भावः (4) सादृश्यः

73. सङ्ख्यापूर्वः ________ ?
(1) द्विगुः (2) कर्मधारयः (3) द्वन्द्वः (4) केवलः

74. ''प्राचार्यः'' इत्यत्र कः समासः ?
(1) द्वन्द्वः (2) तत्पुरुषः (3) अव्ययीभावः (4) बहुव्रीहिः

75. समाहारे द्विगुर्द्वन्द्वश्च ________ स्यात् ।
(1) पुल्लिंगम् (2) स्त्रीलिंगम् (3) उभयलिंगम् (4) नपुंसकलिंगम्

76. पञ्च गावो धनं यस्य -
(1) पञ्चगवम् (2) पञ्चगवधनः (3) पञ्चगङ्गम् (4) पञ्चगवधनाः

77. 'कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः' - भवन्ति -
(1) विग्रहः (2) समासः (3) वृत्तयः (4) वाक्यम्

78. 'पीताम्बरम्' अत्र कः समासः ।
(1) बहुव्रीहिः (2) द्वन्द्वः (3) केवलः (4) कर्मधारयः

79. ''पितरौ'' इत्यत्र कः समासः ?
(1) द्वन्द्वः (2) तत्पुरुषः (3) अव्ययीभावः (4) बहुव्रीहिः

80. त त ज ग ग - इति क्रमे गणयुक्तं वृत्तं किम् ?
(1) इन्द्रवृत्तम् (2) इन्द्रवज्रा (3) ऐन्द्रीमुखम् (4) ऐन्द्री

81. ज त ज र गणयुक्तं वृत्तम् किम् ?
(1) वंशस्थवृत्तम् (2) वंशीनादः (3) खलीवृत्तम् (4) वंशीखः

82. ''किरीटे निशीशो ललाटे हुताशः'' - अत्र किम् वृत्तं प्रयुक्तम् ?
(1) इन्द्रवज्रा (2) वंशस्थम् (3) भुजङ्गप्रयातम् (4) उपेन्द्रवज्रा

83. वसन्ततिलकावृत्ते के गणाः सन्ति ?
(1) न ज भ ज ग ग (2) त भ ज ज ग ग (3) भ र न भ ग ग (4) म र न य ग ग

84. शिखरिणी वृत्ते के गणास्सन्ति ?
(1) य म न स भ ल ग (2) म र न म र ल ग
(3) य र त भ ज ल ग (4) भ ज स म न ल ग

85. भाषायाः मूलतमः संघटकः -
(1) वर्णाः (2) शब्दः (3) ध्वनिः (4) मात्रा

86. भाषोत्पत्तिविषये प्लेटो महोदयस्य कः सिद्धान्तः ?
(1) रणनसिद्धान्तः (2) प्रकृतिसिद्धान्तः (3) धातुसिद्धान्तः (4) सङ्केतसिद्धान्तः

87. 'संस्कृतम्' कस्य परिवारस्य मुख्यभाषाऽस्ति ?
(1) यूरोपीय- (2) भारोपीय- (3) यूनानी- (4) चीनी-

88. 'संस्कृत-भकारस्य' अवेस्तायां किं भवति ?

(1) वकारः (2) भकारः (3) बकारः (4) लकारः

89. शतम् वर्गस्य भाषा नास्ति -

(1) भारत - इरानी (2) बाल्टो - स्लाविक (3) अल्बानी (4) ग्रीक

90. समीचीनम् उत्तरक्रमं चिनुत -

| | | | |
|---|---|---|---|
| i) | रामशब्दस्य तृतीयैकवचनम् | अ) | रामस्य |
| ii) | रामशब्दस्य पञ्चम्येकवचनम् | आ) | रामेण |
| iii) | रामशब्दस्य षष्ठ्येकवचनम् | इ) | रामम् |
| iv) | रामशब्दस्य द्वितीयैकवचनम् | ई) | रामात् |

उत्तरक्रमः

(1) i-अ ii-आ iii-इ iv-ई (2) i-आ ii-इ iii-ई iv-अ

(3) i-आ ii-ई iii-अ iv-इ (4) i-ई ii-इ iii-आ iv-अ

91. 'इदम्' - शब्दस्य नपुंसकलिङ्गे चतुर्थीविभक्तेः रूपं किम् ?

(1) अनेन (2) अस्मै (3) अस्य (4) अस्मिन्

92. समीचीनम् उत्तरक्रमं चिनुत -

| | | | |
|---|---|---|---|
| i) | मरुत्-शब्दस्य सप्तमीबहुवचनम् | अ) | मरुताम् |
| ii) | मरुत्-शब्दस्य द्वितीयाबहुवचनम् | आ) | मरुत्सु |
| iii) | मरुत्-शब्दस्य पञ्चमीबहुवचनम् | इ) | मरुद्भ्यः |
| iv) | मरुत्-शब्दस्य षष्ठीबहुवचनम् | ई) | मरुतः |

उत्तरक्रमः

(1) i-आ ii-ई iii-इ iv-अ (2) i-इ ii-अ iii-आ iv-ई

(3) i-अ ii-आ iii-इ iv-ई (4) i-अ ii-ई iii-आ iv-इ

93. अधोनिर्दिष्टक्रियारूपाणि सम्बद्धधातुभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | भवति | क) | रुध् |
| ii) | पश्यति | ख) | डुकृञ् |
| iii) | करोति | ग) | दृशिर् |
| iv) | रुणद्धि | घ) | भू |

उत्तरक्रमः

(1) i-ख ii-क iii-घ iv-ग (2) i-क ii-ख iii-ग iv-घ

(3) i-ग ii-घ iii-क iv-ख (4) i-घ ii-ग iii-ख iv-क

94. अधोनिर्दिष्टक्रियापदानि सम्बद्धधातुभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | तोत्स्यति | क) | उच् |
| ii) | एति | ख) | तुद् |
| iii) | ऐहिष्यत | ग) | इण् |
| iv) | ओचिता | घ) | ईह् |

उत्तरक्रमः

(1) i-क ii-ग iii-ख iv-घ
(2) i-ख ii-घ iii-ग iv-क
(3) i-ख ii-ग iii-घ iv-क
(4) i-क ii-ख iii-ग iv-घ

95. अधोनिर्दिष्टानि क्रियापदानि सम्बद्धधातुभिः योजयित्वा समीचीनमुत्तरक्रमं चिनुत ।

| | | | |
|---|---|---|---|
| i) | अत्ति | क) | चुर् |
| ii) | अदात् | ख) | अद् |
| iii) | जेष्यति | ग) | डुदाञ् |
| iv) | चोरयति | घ) | जि |

उत्तरक्रमः

(1) i-घ ii-ग iii-ख iv-क
(2) i-ख ii-ग iii-घ iv-क
(3) i-क ii-ख iii-ग iv-घ
(4) i-ख ii-क iii-ग iv-घ

96. प्रातिपदिकसंज्ञा कस्य ?

(1) धातोः (2) प्रत्ययस्य (3) कृदन्तस्य (4) अनुकरणात्मकस्य

97. नपुंसकलिङ्गे किं पदम् ?

(1) अरिः (2) वारि (3) हर्ता (4) करिणी

98. ''कृत्वा'' इति पदं प्रयुज्य साधु वाक्यं लिखत ।

(1) पुत्रः पत्रं कृत्वा पठति ।
(2) माता क्रोधं कृत्वा हसति ।
(3) सेवकः ग्रामं कृत्वा निद्राति ।
(4) सेवकः कार्यं कृत्वा धनमार्जयति ।

99. गृहे पञ्चजनाः <u>अस्ति</u> । रेखाङ्कितपदस्थाने योग्यं पदं चिनुत ।

(1) अस्तु (2) सन्ति (3) स्यात् (4) वर्तते

100. 'रमु क्रीडायाम्' घञ् प्रत्ययेन निष्पद्यते -

(1) रमा (2) रामः (3) रमेशः (4) ज्ञानम्

## SPACE FOR ROUGH WORK